दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् पौषशुक्लतृतीया
पौषः ०७ प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-60 | 1 | दिसम्बर 22, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 ध्याने सकारात्मकस्य समावेशनस्य च समाजं निर्मातुं परिवर्तनस्य च शक्तिः वर्तते - उपराष्ट्रपतिः सी.पी. राधाकृष्णन

3 हिमाचलप्रदेशे रोहताङ्ग, शिन्कुला, दर्चा इत्यादिषु उच्चशिखरेषु हिमपातः

4 षड्मासानामनन्तरम् अपि मार्गाः न पुनर्स्थापिताः - जयरामठाकुरः

## राष्ट्रपतिना द्रौपदी मुर्मु-वर्यया विकसित भारत-ग्रामीण जीविका विधेयकम् अनुमोदितम्

**हिमसंस्कृतवार्ताः** - राष्ट्रपतिना द्रौपदी मुर्मु-वर्यया विकसित भारत-ग्रामीण जीविका विधेयकम् अनुमोदितम्। अधुना-ग्रामीण-परिवारेभ्यः पञ्च विंशत्युत्तर-एक-शत-मितानाम् दिनानां जीविकयाः समर्जनं निश्चप्रचं भविष्यति। एतद्धि मनरेगा योजनायाः स्थानं भजिष्यति।

## भारतेन स्पष्टीकृतं यत् नवदिल्लीस्थ बाङ्गलादेशस्य उच्चायोगस्य बहिः एकत्रितैः प्रदर्शनकारिभिः सुरक्षाव्यवस्था नैव भञ्जिता



**हिमसंस्कृतवार्ताः** - भारतेन स्पष्टीकृतं यत् नवदिल्लीस्थ बाङ्गलादेशस्य उच्चायोगस्य बहिः एकत्रितैः प्रदर्शनकारिभिः सुरक्षाव्यवस्था भञ्जनस्य सामर्थ्यं नैव कृतम्। मन्त्रालयेन एतदपि उक्तं यत् प्रदर्शनकारिभिः बाङ्गलादेशे अल्पसंख्याकानां सुरक्षायाः याचना कृता।

## भारतीयविमानन-प्राधिकरणेन सघन-कुञ्झटिका-कारणेन विमानोड्डयनेषु विलम्बस्य परिवर्तनस्य च परामर्शः प्रख्यापितः

**हिमसंस्कृतवार्ताः** - भारतीय-विमानपत्तन प्राधिकरणेन भारतीयविमानन-प्राधिकरणेन सघन-कुञ्झटिका-कारणेन विमानोड्डयनेषु विलम्बस्य परिवर्तनस्य च परामर्शः प्रख्यापितः अस्ति। यात्रिणः प्रत्यग्र-सूचना-प्राप्त्यर्थं च प्रोक्ताः सन्ति। ऋतुविज्ञानविभागेन देहल्याः, उत्तरप्रदेशस्य, हरियाणायाः, चंडीगढस्य च कतिपय-भागेषु सघन कुञ्झटिकायाः सञ्चेतना पूर्वकं ऑरेंज अलर्ट इति नारङ्ग-सञ्चेतना प्रसारिता अस्ति। प्राधिकरणेन यात्रिणः परामृष्टाः यत्ते निज-विमानानां स्थिति- विषये सम्बद्ध-विमान-समवायस्य आधिकारिक-माध्यमैः सूचनां स्वीकुर्युः अथ च विमान-पत्तनार्थं गमनसमये अतिरिक्त समयं स्वीकृत्य चलेयुः।

## नवीनं विकसित-भारत-जी-राम-जी इत्याख्यं विधेयकं मनरेगा इति योजनायाः विशिष्टः विकास-चरणः - शिवराजसिंहचौहानः



**हिमसंस्कृतवार्ताः** - केन्द्रीय-कृषि-ग्रामीण-विकास-मन्त्री शिवराज सिंह चौहानः संसदि प्रावोचत् यत्-नवीनं विकसित-भारत-जी-राम-जी इत्याख्यं विधेयकं मनरेगा इति योजनायाः विशिष्टः विकास-चरणः अस्ति। अस्य उद्देश्यं विकासस्य निर्धनानां च पक्षे कार्याचरणम् अस्ति। एतस्य विधेयकस्य अन्तर्गतं ग्रामीण-परिवारेभ्यः प्रतिवर्षं पञ्चविंशत्युत्तर-एक-शतं दिनानां वार्षिक-जीविकायाः प्राप्तिः निश्चप्रचं भविष्यति, यद्धि मनरेगा इति योजनायाः शतं दिनानां तुलनायां वर्धितं वर्तते। अमुना प्रोक्तं यत् एतद् विधेयकं निर्धन-कल्याणार्थं ग्रामीण विकासार्थं च महात्म-गान्धिनः विचारधारायाः अनुरूपम् अग्रेवर्धनस्य प्रयासः अस्ति। विशेषतश्च गान्धिनः "ग्रामस्य सम्पूर्ण-विकासः" इत्यस्य दृष्टिकोणे। शिवराज सिंहेन एतदपि प्रोक्तं यत् सर्वकारः निर्धनानां हिते भूरि-कल्याण-योजनाः प्रचालयति। एषः नूतनः विधिरपि अस्यामेव दिशि एकः बृहत् पदक्षेपः वर्तते। विकसित-भारत-गारंटी-फोर-रोजगार एंड-अजीविका-मिशन-ग्रामीण वीबी-जी-राम-जी इत्याख्यं विधेयकम् पारितम् अस्ति। एतस्य अन्तर्गतम् इदानीं ग्रामीण-परिवारेभ्यः पञ्चविंशत्युत्तर-एकशतं दिनानां श्रम-जीविका प्रदास्यते।

## दिसम्बर-षड्विंश्याः आरभ्य यात्रिणां भाटकं युक्तिसंगतं विधास्यन्ते - रेलविभागः



**हिमसंस्कृतवार्ताः** - रेल विभागेन घोषितम् अस्ति यत् दिसम्बर-षड्विंश्याः आरभ्य यात्रिणां भाटकं युक्तिसंगतं विधास्यन्ते। साधारण-श्रेण्यां पञ्चदशोत्तर-द्वि-शत किलोमीटर-पर्यन्तायाः यात्रायाः कृते भाटकं नैव वर्धिष्यते। तदनन्तरं दूरतायाः अनुरूपं प्रतिकिलोमीटरमितं भाटकं वर्धिष्यते। साधारण-श्रेण्यां प्रतिकिलोमीटरमितम् एक-पणकम्, तत्रैव मेल-एक्सप्रेस-रेल-यानानां नॉन-एसी इति वातानुकूलन-रहितायां श्रेण्यां प्रति किलोमीटर-मितम् पणकद्वयं वर्धिष्यते। वातानुकूलन-श्रेण्यामपि प्रति-किलोमीटर-मितम् पणकद्वयं भाटकं वर्धितमस्ति। रेल विभागेन स्पष्टीकृतम् अस्ति यत् उपनगरीय-सेवा-कृते मासिकोत्सवीय-कालार्थं च भाटकं नैव वर्धितम् अस्ति। अनेन भाटक-युक्तीकरणेन प्रवर्तमाने वर्षे प्रायः षट्-शत-कोटि-रूप्यकाणाम् अतिरिक्त-राजस्वार्जनस्य आशा विद्यते। रेल विभागेन एतदपि प्रतिपादितं यत् विगते एकस्मिन् दशके रेलमार्गपट्टिकासञ्जाले, परिचालने च बृहती विस्तृतिः जातास्ति अथ च सुरक्षा-व्यवस्थापूर्वकं रेल सञ्चालनं सुदृढं कर्तुं मानव-संसाधनानि अपि वर्धितानि सन्ति।

## सीमा-सुरक्षा-बले भटानां नियुक्तिकृते अग्निवीराणाम् आरक्षणं प्रतिशतं दश-मिताद् संवर्ध्य प्रतिशतं पञ्चाशत् मितं कृतम्- केन्द्रीयगृह मंत्रालयः



**हिमसंस्कृतवार्ताः** - केन्द्रीय गृह-मंत्रालयेन सीमा-सुरक्षा-बले भटानां नियुक्तिकृते पूर्व अग्निवीराणाम् आरक्षणं प्रतिशतं दश-मिताद् संवर्ध्य प्रतिशतं पञ्चाशत् मितं कृतम् अस्ति। अधिसूचनायाः अनुसारेण प्रथम-गुल्मस्य पूर्व अग्निवीराणां अधिकतम आयु सीमासु अपि पञ्च-वर्षाणां शैथिल्यं प्रदास्यते, तत्रैव अन्य पूर्व-अग्निवीरेभ्यः वर्षत्रयस्य शैथिल्यं प्रदास्यते। अनेन सममेव पूर्व अग्निवीरेभ्यः शारीरिक-मानक-परीक्षणे शारीरिक दक्षता परीक्षणे अपि शैथिल्यं प्रदास्यते।

## सुभाषितम्

**द्वेषः कस्य न दोषाय,**
**प्रीतिः कस्य न भूतये।**
**दर्पः कस्य न पाताय,**
**नोन्नत्यै कस्य नम्रता।।**
**(दर्पदलन/क्षेमेन्द्र - १/३२)**

अर्थात्- द्वेष करने से किस में दोष नहीं आ जाता? प्रेम से किसकी उन्नति नहीं होती? अभिमान से किसका पतन नहीं हो सकता? और नम्रता से किसकी उन्नति नहीं हो सकती?

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## एमनेस्टी-इंटरनेशनल-समवायेन पाकिस्तानस्य पत्रकारस्य सोहराब बरकतस्य निगडने चिन्ता प्रकाशिता



**हिमसंस्कृतवार्ता-** एमनेस्टी-इंटरनेशनल-समवायेन पाकिस्तानस्य पत्रकारस्य सोहराब बरकतस्य निगडने चिन्ता प्रकाशिता, यः खलु ऑनलाइन इति अन्तर्जालीय-आलोचनायाः आरोपे साइबर सुरक्षा-विधि-नियमस्य अन्तर्गतं निगडीकृतः अस्ति। सोहराब बरकतः राज्य-संस्थानां ऑनलाइन आलोचनायाः आरोपे निगडितः अस्ति।

# प्रधानमन्त्री श्रीनरेन्द्रमोदी असमस्य नामरूपक्षेत्रे षट्-शताधिक-दश-सहस्र-कोटिकाधिकैः रूप्यकैः निर्मितस्य उर्वरकसंयन्त्रस्य आधारशिलां संस्थापितवान्




**हिमसंस्कृतवार्ताः -** प्रधानमन्त्री श्रीनरेन्द्रमोदी असमस्य नामरूपक्षेत्रे षट्-शताधिक-दश-सहस्र-कोटिकाधिकैः रूप्यकैः निर्मितस्य उर्वरकसंयन्त्रस्य आधारशिला संस्थापिता। अनेन संयन्त्रेण उर्वरकस्य आयाते निर्भरता न्यूनीभविष्यति। जीविकायाः पारेसहस्रं नूतनाः अवसराश्च सृजिताः भविष्यन्ति। अस्याः परियोजनायाः उद्देश्यः उर्वरक उत्पादनस्य सुदृढीकरणं, वर्धनम् अपि च कृषि-क्षेत्रे वृद्धेः समर्थनं आसीत्। एतत् संयंत्रं प्रतिवर्षं सहस्राधिक-द्वादश-लक्ष-मीट्रिक टनमितं रासायनिकम् उर्वरकं उत्पादयिष्यति। अस्मिन् अवसरे श्री मोदी उक्तवान् यत् एतत् संयंत्रं उर्वरक-आयातस्य उपरि भारतस्य निर्भरतां न्यूनीकरिष्यति अपि च वृत्तेरवसराणां सृजनं भविष्यति। प्रधानमन्त्री उक्तवान् यत् पुरातन्याः निर्माणशालायाः प्रौद्योगिकी अप्रासंगिकता प्राप्ता। परञ्च काङ्ग्रेस प्रशासनेन अस्मिन् विषये ध्यानं न दत्तम्। अस्मात् कारणात् नामरुपस्य बहूनि संयंत्राणि पिहितानि जातानि। प्रधानमन्त्री उक्तवान् यत् द्विविधं इञ्जनयुतं प्रशासनं अधुना काङ्ग्रेस प्रशासनेन निर्मितानाम् समस्यानां समाधानं करोति । श्रीमोदिना उक्तं यत् चतुर्दशोत्तरद्विसहस्रतमे वर्षे सम्पूर्ण देशे केवलं पञ्चविंशत्यधिकद्विशतलक्षं मीट्रिकटनमितस्य रासायनिक उर्वरकस्य उत्पादनं भवति स्म । अपरत्र विगत-एकादशवर्षेषु परिश्रमस्य अनन्तरं एतत् उत्पादनं प्रायः षडोत्तर-त्रिशत-लक्ष-मीट्रिक टनमितं यावत् वर्धितम् अस्ति

# पूर्वप्रधानमन्त्री भारतरत्न अटलबिहारी वाजपेयी इत्यस्य जन्मशताब्द्याः अवसरे इन्दौरनगरे “शून्यतः शताब्दीः अटलभारतस्य शताब्दी” इति स्मृतिकार्यक्रमस्य आयोजनम्




पूर्वप्रधानमन्त्री भारतरत्न अटलबिहारी वाजपेयी इत्यस्य जन्मशताब्द्याः अवसरे इन्दौरनगरे “शून्यतः शताब्दीः अटलभारतस्य शताब्दी” इति स्मृतिकार्यक्रमस्य आयोजनं कृतम्। उपाध्यक्ष सी.पी.राधाकृष्णन कार्यक्रमे उपस्थितः। अस्मिन् अवसरे उपराष्ट्रपतिना मुख्यमन्त्रिणा मोहनयादवेन, राज्यपालेन मङ्गुभाई पटेलेन च सह डाली महाविद्यालयपरिसरस्य लोकमातादेवी अहिल्याबाई इत्यस्याः प्रतिमायाः अनावरणं कृतम्। मुख्यमन्त्री मोहनयादवः सूचितवान् यत् २५ दिसम्बरदिनाङ्के अटलजी इत्यस्य जन्मशताब्दीसमाप्तेः अवसरे केन्द्रीयगृहसहकारमन्त्री अमितशाहः भूमिपूजनं, औद्योगिक-एककानाम् उद्घाटनं च ग्वालियर-नगरे २ लक्षकोटि-रूप्यकाधिक-निवेशेन करिष्यति।


# ध्याने सकारात्मकस्य समावेशनस्य च समाजं निर्मातुं परिवर्तनस्य च शक्तिः वर्तते - उपराष्ट्रपतिः सी.पी. राधाकृष्णन



**हिमसंस्कृतवार्ताः -** उपराष्ट्रपतिः सी.पी. राधाकृष्णन् उक्तवान् यत् ध्याने सकारात्मकस्य समावेशनस्य च समाजं निर्मातुं परिवर्तनस्य च शक्तिः वर्तते। हैदराबादनगरस्य कान्हा-शान्ति-वनम् इत्याख्ये स्थले द्वितीय-विश्वध्यान दिवसमाधृत्य सः अब्रवीत् यत् हार्टफुलनेस मूवमेंट इति संस्था शान्ति-सौहार्द-आध्यात्मिक-कल्याणाय महत्त्वपूर्ण कार्यं कुर्वद् अस्ति। सः अवदत् यत् मुक्तं चेतनं च मनः लोकसेवायां समाजे च सकारात्मकं परिवर्तनं कर्तुं शक्नोति। डॉ. राधाकृष्णन् उक्तवान् यत् ध्यानम् भारतस्य प्राचीनस्य आध्यात्मिकपरम्परायाः भागः अस्ति यत् मनसः चेतनायाः च विज्ञानं वर्तते।

# दुबई-मध्ये "अंडर-19" इति पुरुषाणां एशिया-चषकीये अन्त्यचक्रीये द्वन्द्वे पाकिस्तानेन भारतं पराजितम्

**हिमसंस्कृतवार्ताः -** दुबई-मध्ये "अंडर-19" इति ऊनविंशतिः वर्षा-भ्यान्तर्वर्तिनां पुरुषाणां एशिया-चषकीये अन्त्यचक्रीये द्वन्द्वे पाकिस्तानेन भारतं पराजितम्। धेयं अस्ति यत् पाकिस्तानेन प्रदत्तम् अष्टचत्वारिंशदुत्तर-त्रिशत-मितानां धावनांकानां लक्ष्यम् अनुसरद् भारतीयं दलं षट् पंचाशदुत्तर एकशतं धावनांकेषु एव बहिर्भूतम् ।




# देशस्य विकासाय संगठितसमाजः अत्यावश्यकः :संघप्रमुख डॉ. मोहन भागवतः



राष्ट्रीयस्वयंसेवकसंघस्य प्रमुखः डॉ. मोहन-भागवतः देशस्य विकासाय संगठितसमाजः अत्यावश्यकः इति उक्तवान्। कोलकातानगरस्य विज्ञाननगरे राष्ट्रीयस्वयंसेवक-संघस्य शताब्दीसमारोहे आयोजिते कार्यक्रमे भारते हिन्दुसमाजस्य आयोजनस्य आवश्यकतां उक्तवान्। डॉ. भागवतः स्पष्टीकरोति यत् आरएसएस-सङ्घः कस्यचित् विरोधात् प्रतिक्रियायाः वा कारणेन न निर्मितः। सः अवदत् यत् राष्ट्रीयस्वयंसेवकसंघः कस्यापि व्यक्तिगतलाभस्य वा संगठनात्मकस्य वा लाभाय कार्यं न करोति।

# इसरो बुधवासरे संचार-उपग्रहं ब्लूबर्ड्-खण्ड-२ प्रक्षेपयिष्यति

भारतीय-अन्तरिक्ष-अनुसन्धान-सङ्गठनम् (इसरो) बुधवासरे संचार-उपग्रहं ब्लूबर्ड्-खण्ड-२ प्रक्षेपयिष्यति । अमेरिकी-आधारितस्य ए.एस.टी.-स्पेस्मोबाइल-कम्पन्योः स्वामित्वं धारितः अयं उपग्रहः एलवीएम-३-एम६-रॉकेट्-इत्यनेन अद्यपर्यन्तं निम्नपृथिव्याकक्षायां प्रक्षेपितः बृहत्तमः वाणिज्यिक-उपग्रहः भविष्यति इदं ब्लूबर्ड् ब्लॉक्-२ उपग्रहस्य अग्रिमपीढ्याः अस्ति, यत् अन्तरिक्षतः प्रत्यक्षतया सामान्यमोबाइलस्मार्टदूरभाषयन्त्रेषु सेलुलर ब्रॉडबैण्ड्-संपर्कं प्रदातुं विनिर्मितम् अस्ति ।

# मनरेगायां कृतपरिवर्तनस्य विरोधे आन्दोलनं करिष्यति सर्वकारः - सुक्खुः

**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः घोषणां कृतवान् यत् राज्यसर्वकारः मनरेगायां कृतपरिवर्तनस्य विरोधे आन्दोलनं करिष्यति। सर्वे राज्यमन्त्रिणः जनद्वारे एकहोरायाः उपवासं करिष्यन्ति। सः अवदत् यत् मनरेगा हिमाचलप्रदेशस्य महत्त्वपूर्णं हानिं करिष्यति, काङ्ग्रेसपक्षः च एतत् गम्भीरतापूर्वकं गृह्णाति। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः शिमलानगरे पत्रकारैः सह अनौपचारिकरूपेण भाषमाणः आसीत्।सः अवदत् यत् मनरेगा पूर्वप्रधानमन्त्रिणः डॉ. मनमोहनसिंहस्य पूर्व-यूपीए-अध्यक्षायाः सोनियागान्धी-महोदयायाः च मस्तिष्कस्य उपजः आसीत्, येन ग्रामीणक्षेत्रेषु शतदिनानां जीविका सुनिश्चिता अभवत्। इयं योजना कोविड-१९ महामारी-काले अत्यन्तं सहायकं सिद्धा अभवत् । तया महिलानां कार्यस्य अवसराः अपि प्राप्ताः, परन्तु केन्द्रसर्वकारेण ग्राम्य-अर्थव्यवस्थां निरुद्धं कृत्वा हानिः कृता । सः अपि अवदत् यत् राज्यसर्वकारेण अपि मनरेगा-वेतनं प्रतिदिनं ₹80 इत्येव द्विवारं वर्धितम् अस्ति।जीएसटी-द्वारा अपि राज्यस्य हानिः अभवत् इति सः अवदत् । पूर्वं बद्दी इत्यादिषु औद्योगिकक्षेत्रेषु एव जीएसटी-रूप्यकाणां ₹४,००० कोटिरूप्यकाणां उत्पादनं भवति स्म, परन्तु तत् अधुना निवृत्तम् अस्ति । सः अवदत् यत् जीएसटी इत्यस्य लाभं विचार्य उद्योगेभ्यः त्रीणिरुप्यकाणि प्रतिमात्रकं विद्युत्प्रदानस्य निर्णयः कृतः। नूतनायाम् औद्योगिकनीतौ प्रति-एककं ३ कृतम् । सः अपि अवदत् यत् जीएसटी उपभोक्तृ-आधारितः अस्ति, अर्थात् महाराष्ट्रः, उत्तरप्रदेशः, बिहारः इत्यादीनां अधिकजनसंख्यायुक्तानां राज्यानां लाभः अभवत्।

## पर्यटनक्षेत्रे २४०० कोटिरूप्यकाणां निवेशं करोति सर्वकारः - मुख्यमंत्री

मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः उक्तवान् यत् राज्यसर्वकारः पर्यटनक्षेत्रे २४०० कोटिरूप्यकाणां निवेशं करोति। तदर्थं काङ्गड़ा-विमानस्थानकस्य विस्ताराय ३,००० कोटिरूप्यकाणि व्यय्यन्ते यत्र भूमिप्राप्त्यर्थं ५०० कोटिरूप्यकाणि व्ययन्ते। सः अवदत् यत् पर्यटनक्षेत्रे जीएसटी इत्यस्य १८% योगदानं भवति, तस्य विषये सर्वकारः विशेषं ध्यानं ददाति।


## स्वास्थ्यपर्यटनस्य प्रवर्धनं भविष्यति

मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् सर्वकारः स्वास्थ्यपर्यटनस्य प्रचारं करिष्यति। सः अवदत् यत् राज्यस्य जलवायुः स्वास्थ्याय उत्तमः अस्ति। अतः स्वास्थ्यपर्यटनस्य सम्भावनासु सर्वकारः कार्यं कुर्वन् अस्ति

## तपोवने अन्ताराष्ट्रीयसम्मेलनकेन्द्रस्य निर्माणं भविष्यति

मुख्यमन्त्री धर्मशाला-नगरस्य तपोवने अन्ताराष्ट्रीय-सम्मेलन-केन्द्रस्य निर्माणस्य योजनां कुर्वन् अस्ति इति मुख्यमन्त्री अवदत् । अनेन क्षेत्रे पर्यटनं अपि वर्धयिष्यते । धर्मशालायां विमानस्थानकस्य विस्तारः काङ्गड़ां पर्यटनराजधानीरूपेण विकसितुं साहाय्यं करिष्यति।

# हिमाचलप्रदेशस्य एम्स-चिकित्सालये अधुना अधिकं सुरक्षितं भविष्यति कर्कट-रोग-उपचारःउपकरणानां क्रयार्थं निविदा निर्गता




**हिमसंस्कृतवार्ताः - डॉ पद्मनाभः, बिलासपुरम्।** हिमाचलप्रदेशस्य बिलासपुर-स्थिते एम्स्-चिकित्सालये कर्कट-रोगिणाम् उपचारम् अधिकं सटीकं सुरक्षितं च कर्तुं प्रक्रिया आरब्धा अस्ति। संस्थानेन सरफेस-गाइडेड्-रेडिएशन-सिस्टम (Surface Guided Radiation System – SGRT) नामकस्य अत्याधुनिक-उपकरणस्य क्रयार्थं निविदा निर्गता अस्ति। एषा अत्याधुनिकी तकनीकी रेडिएशन-थेरेपी-काले रोगिणः प्रत्येकां गतिं निरन्तरं निरीक्षते तथा आवश्यकतायां स्वयमेव रेडिएशन-यन्त्रं निरोधयति। चिकित्सक-विशेषज्ञाः वदन्ति यत् एसजीआरटी-प्रणाल्याः अनुमानितं मूल्यं द्वि-अर्ध-कोटि-रूप्यकात् त्रि-कोटि-रूप्यक-पर्यन्तं भवति। अस्य उपकरणस्य आगमनेन एम्स्-बिलासपुरम् तेषु अल्पेषु संस्थानेषु अन्तर्भविष्यति, यत्र रेडिएशन-थेरेपी-क्षेत्रे एषा आधुनिक-सुविधा उपलब्धा अस्ति।

एम्स्-प्रशासनस्य प्रकाशितायां निविदायां निर्दिष्टं यत् अस्य उपकरणस्य एकमेव एककं क्रियते। निविदायां केवलं उपकरण-आपूर्तिः एव न, अपि तु तस्य स्थापना, परीक्षणं, कमीशनिङ्ग तथा रेडिएशन-यन्त्रेण सह एकीकरणं (इंटीग्रेशन) अपि अन्तर्भूतम् अस्ति।

## शरीरस्य बाह्य-पृष्ठं अन्वीक्षणं करोति

सरफेस-गाइडेड्-रेडिएशन-सिस्टम द्वारा रोगिणः शरीरस्य बाह्य-पृष्ठं क्रमवीक्षणं कृत्वा तस्य स्थितिः निरन्तरं निरीक्ष्यते। यदि उपचार-काले श्वसनात्, कासात् अथवा लघु-गतिमात्रेण रोगी स्वनिर्धारितात् स्थाने विचलति, तर्हि एषा प्रणाली तत्क्षणं रेडिएशन-यन्त्रं स्थगयति। यदा पुनः सम्यक् स्थितिः प्राप्यते, तदैव रेडिएशन पुनः आरभ्यते। एषा सम्पूर्णा प्रक्रिया अतिरिक्त-एक्स-रे अथवा रेडिएशन-विना एव भवति। अतः रेडिएशन केवलं ट्यूमर-भागे एव केन्द्रितं भवति, येन हृदयः, फुफ्फुसौ, मेरुदण्डः च स्वस्थ-अङ्गानि सुरक्षितानि तिष्ठन्ति।

## शरीरे चिह्न-स्थापनस्य आवश्यकता नास्ति

अस्य उपचारस्य काले शरीरस्य उपरि टैटू अथवा मसि-चिह्नानां स्थापनस्य आवश्यकता न भवति, येन रोगिणः मानसिकं शारीरिकं च कष्टं न्यूनीभवति। एषा तकनीकी विशेषतया स्तन-कर्कट, फुफ्फुस-कर्कट, शिरः-ग्रीवा-कर्कट तथा प्रोस्टेट-कर्कट-रोगिणां कृते अत्यन्तं लाभदायिनी मन्यते।

## केवलं ट्यूमर-भागे एव रेडिएशनम्

अनया प्रणाल्या रेडिएशन-थेरेपीस्य सटीकता बहुगुणा वर्धते। अनुचित-रेडिएशनस्य सम्भावना प्रायः समाप्ता भवति। अतः उपचारः अल्प-काले एव सम्पद्यते तथा रोगिणः पुनः-पुनः स्थिति-समायोजनस्य कष्टं न सहनं कर्तव्यम् भवति



# हिमाचलप्रदेशे रोहताङ्ग, शिन्कुला, दारचा इत्यादिषु उच्चशिखरेषु हिमपातः


हिमाचलप्रदेशे परिवर्तिते वातावरणे पुनः राज्यस्य उच्चशिखरेषु रोहताङ्ग, शिन्कुला, दारचा इत्यादिषु हिमपातः अभवत्। रविवासरे राज्यस्य उच्चक्षेत्रेषु हिमपातेन शीतलवायुः आगतवान्, येन सम्पूर्णे राज्ये अधिकं शैत्यं जातम्। दिसम्बरमासस्य तृतीयसप्ताहे वातावरणस्य चरित्रं परिवर्तितम् अस्ति । रविवासरस्य प्रातःकालादेव मेघयुक्तेन आकाशेन राजधानी सहितं मनाली-नगरस्य पर्वतस्थानकेषु शीतं तीव्रं जातम्, यदा तु सघननीहारेन समतलक्षेत्रेषु, निम्नप्रदेशेषु च जीवनस्य गतिः मन्दा अभवत्। रोहताङ्ग-लाहौल-स्पिति-नगरयोः उच्चतरप्रदेशेषु नवीनहिमपातः अभवत् । इदानीं बिलासपुर, उना, मण्डी इत्यादिषु राज्यस्य निम्न-समतलजिल्हेषु सघन-नीहारेण दृश्यतायां महत्त्वपूर्णः प्रभावः अभवत् । प्रातःकाले विलम्बितरात्रौ च बह्वेषु क्षेत्रेषु दृश्यतायाः भृशं न्यूनता अभवत्, येन मार्गयानस्य बाधा अभवत्, चालकाः सावधानतां स्थापयितुं बाध्यन्ते स्म मौसमविभागेन सचेतना अधिसूचिता यत् राज्यस्य निम्नजनपदेषु आगामिषु चतुर्दिनेषु विलम्बितरात्रौ प्रातःकाले च सघननीहारस्य प्रचलनं सम्भवति। अस्य कृते पीतवर्णीयसचेतना अधिसूचिता अस्ति।

# चमियाणायां बालकानां कृते उन्नतबालरोग-केन्द्रस्य स्थापना भविष्यति - मुख्यमंत्री सुक्खुः



**हिमसंस्कृतवार्ताः - डॉ पद्मनाभः, शिमला ।**मुख्यमन्त्री सुखविन्द्रसिंहसुक्खूः रविवासरे राष्ट्रिय-टीकाकरण-दिवसस्य अवसरे शिमलानगरे कमलानेहरू- चिकित्सालये आयोजितस्य राज्यस्तरीयस्य सघन-पल्स-पोलियो-अभियानस्य शुभारम्भं कृतवान्। अस्मिन् अवसरे सः लघुशिशून् पोलियो-रोगात् रक्षार्थं औषध-पानम् अपि कारितवान्। अभियानस्य सफलतायै चिकित्सकान्, आंगनवाडी-कार्यकर्तॄन्, आशा-कार्यकर्तॄन्, एएनएम्, पंचायती-राज-संस्थानानि, विद्यालय-शिक्षकान् तथा प्रशासनं च सः प्रशंसितवान्।अवसरेऽस्मिन् मुख्यमन्त्री अवदत् यत् प्रदेश-सर्वकारः प्राथमिक-स्वास्थ्य-केन्द्रात् आरभ्य चिकित्सालय-महाविद्यालय-पर्यन्तं स्वास्थ्य-सेवानां सुदृढीकरणं करोति। सः अवदत् यत् चमियाणास्थिते अटल-इन्स्टिट्यूट्-ऑफ्-मेडिकल्-सुपरस्पेशलिटी-आयुर्विज्ञाने उन्नतं बालरोग-केन्द्रं स्थापितं भविष्यति। अस्मिन् केन्द्रे बालकानां चिकित्सायै विश्वस्तरीयाः सुविधाः तथा आधारभूतं संरचनात्मकं प्रारुपं विकसितं करिष्यते। सः अपि अवदत् यत् सप्ततिवर्षात् अधिक-वयस्कानां वृद्धजनानां कृते चिकित्सालयेषु ओपीडी-परामर्शाय विशेष-कालखण्डाः निर्धारिताः भविष्यन्ति, येन ते प्रतीक्षां विना सुकरं उपचारं प्राप्स्यन्ति।मुख्यमन्त्रिणाऽपि उक्तं यत् प्रदेश-सर्वकारः शिक्षा-स्वास्थ्य-क्षेत्रयोः विशेषं प्राधान्यं ददाति। स्वास्थ्य-क्षेत्रस्य अधिकं सशक्तीकरणाय विश्वस्तरीया तकनीकी तथा आधारभूत-संरचना विकसितं क्रियते। चिकित्सा-सेवानां सुदृढीकरणार्थं सर्वाणि रिक्त-पदानि चरणबद्ध-रीत्या पूर्यन्ते।मुख्यमन्त्री सुखविन्द्रसिंहसुक्खूः अवदत् यत् सघन-पल्स-पोलियो-टीकाकरण-अभियानस्य प्रमुखोद्देश्यं प्रदेशस्य पोलियो-मुक्त-स्थितेः संरक्षणं भवति। अस्य अभियानस्य अन्तर्गतं सम्पूर्णे प्रदेशे ५,७९३ पोलियो-बूथेषु शून्य-वर्षात् पञ्च-वर्ष-आयु-पर्यन्तं प्रायः षट्-लक्षं बालकानां पोलियो-प्रतिरोधक-मात्रा पायिताः भविष्यन्ति। अस्य सफल-सञ्चालनाय ११,७०६ टीकाकरण-दलानि नियोजितानि सन्ति। सः अवदत् यत् २२ तथा २३ दिसम्बर्-दिने मॉप-अप्-दिवसयोः गृहं-गृहं गत्वा वंचित-बालकाः, प्रवासी-परिवाराः तथा उच्च-आशंका-क्षेत्राणि आवृतानि भविष्यन्ति। अभियाने आवश्यकं सूच्यौषधम्, कोल्ड-चेन-उपकरणानि तथा अन्याः लॉजिस्टिक-सामग्र्यः पूर्वमेव सर्वेभ्यः जिलाभ्यः उपलब्धाः कृताः सन्ति।मुख्यमन्त्रिणा केएनएच-चिकित्सालये रोगिभिः तेषां परिजनैः सह संवादः कृतः तथा अधिकारिभ्यः आवश्यक-निर्देशाः दत्ताः। सः अवदत् यत् स्वास्थ्य-क्षेत्रे अत्याधुनिक-प्रौद्योगिक्याः उपयोगाय प्रदेश-सर्वकारः सर्वोच्चं प्राधान्यं ददाति। शिमलायां चमियानास्थिते चिकित्सालये तथा कांगड़ा-जिलायां टांडा-चिकित्सामहाविद्यालये ऐतिहासिक-उपक्रम-रूपेण रोबोटिक्-शल्यचिकित्सायाः आरम्भः कृतः अस्ति। सः अवदत् यत् चिकित्सामहाविद्यालयाद् आरभ्य नागरिकचिकित्सालय-पर्यन्तं पुरातन-यन्त्राणि परिवर्त्यन्ते। स्वास्थ्य-संस्थासु एमआरआई, सिटी-स्कैन् तथा एक्स-रे-यन्त्र-स्थापनाय त्रि-सहस्र-कोटि-रूप्यकाणां व्ययः क्रियते। सः अपि अवदत् यत् प्रदेशे एम्स्-दिल्ली-सदृशेण रोगिभ्यः उत्तमाः स्वास्थ्य-सेवाः प्रदीयन्ते। रोगिणां कृते आधुनिक-सुविधाभिः युक्ताः आघात-केन्द्राणा अपि स्थापितानि सन्ति।अस्मिन् अवसरें स्वास्थ्य-मन्त्री डॉ. (कर्नल्) धनीरामशाण्डिलः, विधायकः हरीशः जनारथा, सचिवः संदीपः कदमः, एनएचएम्-प्रबन्ध-निदेशकः प्रदीपठाकुरः, स्वास्थ्य-निदेशकः डॉ. गोपालः बेरी, स्वास्थ्य-शिक्षा-निदेशकः डॉ. राकेशः शर्मा तथा अन्ये वरिष्ठ-अधिकारिणः उपस्थिताः आसन्।

# षड्मासानामनन्तरम् अपि मार्गाः न पुनर्स्थापिताः - जयरामठाकुरः



**हिमसंस्कृतवार्ताः - शिमला।**
विपक्षस्य नेता जयरामठाकुरः उक्तवान् यत् सुखविन्दरसिंहसुक्खुसर्वकारः आपदापश्चात् राज्याय आश्रयं दातुं सर्वथा असंवेदनशीलः अप्रभावी च सिद्धः अभवत्। षड्मासाभ्यन्तरे पङ्कशिलाभिः पूरयित्वा अपि प्रक्षालितमार्गान् पुनः स्थापयितुं सर्वकारः असफलः अभवत् । फलतः मण्डी-नगरस्य परिसरेषु च शतशः पंचायताः मार्गसंपर्कात् विच्छिन्नाः एव तिष्ठन्ति । शतशः ग्रामाः वाहनानां दुर्गमाः एव तिष्ठन्ति । आपत्काले रोगी, वृद्धा, गर्भिणी वा अपि चिकित्सालयं प्रति परिवहनं करणीयम्, शिविकायां परिवहनं करणीयम्, किलोमीटर् यावत् पादचालनं करणीयम् आपदि ये मार्गाः प्रक्षालिताः आसन् ते दृढीन कृताः, किं पुनर्स्थापनं न कृतम्, ग्राम्यक्षेत्रेषु तेषु स्थिताः गर्ताः अपि न पूरिताः। विभागस्य अधिकारिणः बजटस्य अभावस्य उल्लेखं कृत्वा मार्गाणां पुनर्स्थापनं कर्तुं स्वस्य असमर्थतायाः व्याख्यानं निरन्तरं कुर्वन्ति। सार्वजनिकमञ्चेषु वा सदने वा बजटस्य अभावस्य व्याख्यां सर्वकारः न ददाति। मण्डी-नगरेषु, तत्समीपस्थेषु च मण्डलेषु सर्वाधिकं विनाशः अभवत्, परन्तु सर्वकारः आश्रयकार्यात् उत्सवान् अधिकं महत्त्वपूर्णं मन्यते स्म । अस्य कृते बजटस्य अभावः नासीत्, यतः केन्द्रसर्वकारेण आपदानिवारणाय प्रेषितं धनम् उत्सवस्य कृते उपयुज्यते स्म। विपक्षस्य नेता जयरामठाकुरः अवदत् यत् यदि सर्वकारः तया एव तीक्ष्णतापूर्वकं मार्गाणां पुनर्स्थापनं कृतवान् स्यात्, इदानीं नियमितरूपेण आपदाप्रभावितान् जनान् पुलिसस्थानेषु आहूय, तेषां विरुद्धं मिथ्याप्रकरणं कुर्वन् अस्ति, तर्हि वयं वर्तमानकालस्य दर्शनं न करिष्यामः। उत्सवेषु, महोत्सवेषु च सर्वकारेण समयः, साधनानि च निवेशितानि, परन्तु येषु क्षेत्रेषु गृहाणि, मार्गाणि, आजीविका च नष्टाः सन्ति, तत्र आश्रयस्य, पुनर्वासस्य च लक्षणं नास्ति प्रभावितजनानाम् समये सहायता न प्राप्ता, न च सर्वकारेण ठोसकार्ययोजनायाः अनावरणं कृतम्। मुख्यमन्त्री मार्गपुनर्स्थापनार्थं बजटमपि न विमोचयति। मार्गाणां दृढीकरणं विस्मरन्तु, प्रक्षालितमार्गेषु मृत्तिकां योजयित्वा अस्थायीपुनर्स्थापनमपि न सम्पन्नम्। जयरामठाकुरः अवदत् यत् इदानीं शिशिरः आरब्धः अस्ति, हिमपातः अपि निकटः अस्ति, परन्तु आपदाग्रस्तानां जनानां निवासस्थानं नास्ति, भविष्यस्य आशा च नास्ति। सर्वकारेण न अस्थायी आवासः प्रदत्तः, न च शीतात् तेषां रक्षणार्थं किमपि दृढयोजना निर्मिता। सः अवदत् यत् राज्यसर्वकारस्य उदासीनतायाः निष्क्रियतायाः च कारणेन राज्यस्य आपदापीडिताः जनाः स्वयन्त्रे एव त्यक्ताः।

# संस्कृतभारत्याः संस्कृत-भाषा-बोधनवर्गस्य शुभारम्भः




**हिमसंस्कृतवार्ता डॉ. निशिकान्तपाण्डेयः डिमापुर, असमप्रदेशः।** नागभूमेः डिमापुरे स्थिते श्रीदिगम्बर-जैन-गर्ल्स्-कोलेज् महाविद्यालये २१.१२.२०२५ तमे दिनाङ्के संस्कृतभारत्याः संस्कृत-भाषा-बोधनवर्गस्य शुभारम्भः सफलतया सम्पन्नः। उद्घाटनसत्रे मुख्यवक्तारूपेण सुप्रसिद्धः सामाजिक-व्यवसायिकः श्रीचन्दु अग्रवालः महोदयः उपस्थितः आसीत्। विशिष्टातिथिरूपेण च डिमापुरस्थितस्य रेल्वे विद्यालयस्य प्रधानाचार्यः श्रीस्वागतमहोदय अलङ्कृतवान्। वर्गशिक्षकः कुमारभास्करवर्म-संस्कृत-पुरातनाध्ययन-विश्वविद्यालयस्य संस्कृतव्याकरणविभागस्य अतिथि-अध्यापकः डा. मिलनमाजी महोदयः संस्कृत-भाषाबोधन-वर्गस्य प्रारूपं सरलया संस्कृतभाषया स्पष्टतया प्रबोधितम्। अवसरान्तरे संस्कृताचार्यः श्रीकृष्णराजवंशी महोदयः शुद्धतया भक्तिपूर्णया च श्रीमद्भगवद्गीतापाठं कृतम्। कार्यक्रमस्य सुचारु-समचालनं पूर्वोत्तर-भारतस्य क्षेत्रीय-संगठनमन्त्री श्रीमोहन कण्णन् महोदयेन कुशलतया कृतम्। समग्रे वर्गे सौहार्दस्य, आध्यात्मिकतायाः तथा च अध्ययनचर्चायाः विशेषः उत्साहः द्रष्टुं शक्यते स्म।



✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# कलिप्रसङ्गः -०२


गोस्वामी तुलसीदासः स्वमानसग्रन्थे वदति- कलियुगस्य पापैः सर्वे ग्रसिताः, सद्ग्रन्थाः सर्वे लुप्ताः स्युः, दम्भिभिः स्वबुद्ध्या, स्वेच्छया, स्वकल्पनया वा बहवः पन्थानः प्रकटीकृताः। सर्वे मनुष्याः मोहजाले समावृताः अभवन्, शुभकर्माणि लोभेन अपहृतानि। कलियुगे वर्णधर्माः, चत्वारः आश्रमाः च न तिष्ठेयुः, सर्वे स्त्रीपुरुषाः वेदविरुद्धं कर्माचरणं कुर्युः। ब्राह्मणाः वेदादिशास्त्राणां विक्रयणं कुर्युः, राजानः, नेताः वा प्रजाभ्यः क्लेशं दद्युः, भक्षयेयुः वा। वेदाज्ञां न कोऽपि मन्येत। यस्य कृते यत् भाति, तदेव तस्य मार्गः स्यात्। यः जल्पनचतुरः, स हि महान् पण्डितः। यः आडम्बरी, दम्भरतः च, तं हि साधुं वदेयुः सर्वे। यः परेषां धनम् अपहरेत्, सः हि बुद्धिमान्। यः दम्भी, सः हि आचारी। एवं यः मिथ्यावादी, उपहसितुं निपुणः, कलियुगे सः हि गुणवान् कथ्येत्। यः आचारहीनः, त्यक्तवेदमार्गः च, कलौ सः हि वैराग्यवान् स्यात्। यः पालितनखः, जटाधारी च, सः हि कलौ प्रसिद्धः तपस्वी आख्यायेत। जगति कवीनां महान् समूहः एव स्यात्, परं तेषाम् आश्रयदाता न कोऽपि भवेत्। गुणेषु दोषद्रष्टारः बहवः भवेयुः, परं गुणी न कोऽपि भवेत्। कलियुगे वारं वारं दुर्भिक्षम् आपतेत्, अन्नाभावात् जनाः दुःखिनः सन्तः स्वप्राणान् त्यजेयुः। अहो, कलिमहिमा वर्णयितुम् अशक्यः एव इति।

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमो नमः नन्दिनि। अद्य आकाशमण्डलस्य रहस्यानि प्रकटितानि सन्ति।
**नन्दिनी-** सत्यम्। जेम्स्-वेब-दूरदर्शकयन्त्रेण ब्रह्माण्डे सुदूरे स्थिता एका अधिनवतारा दृष्टा। एतद् दृश्यं यन्त्रेण सुस्पष्टं गृहीतं वर्तते।
**काव्या-** तस्याः अधिनवतारायाः प्रकाशः इव भूमौ सौरशक्तिः अपि वैज्ञानिकैः वर्धिता। तैः सिकातुजारेयस्य (Germanium Oxide) एकः सूक्ष्म-स्तरः रचितः अस्ति। तेन सौरकोशानां कार्यक्षमता त्रिंशत्-प्रतिशतं यावत् वर्धिता।
**नन्दिनी-** सिकातुजारेयस्य साहाय्येन ऊर्जा लब्धा, तत् अतीव उत्तमम्। ऊर्जा इव शरीरस्य आरोग्यम् अपि मुख्यम्। अधुना अन्त्रस्य शुद्धये एका महती ओषधिः वैज्ञानिकैः लब्धा। अनया नूतनौषध्या अन्त्रस्य घातक-रोगाः नाशिताः।
**काव्या-** ओषध्या रोगाः दूरीकृताः, तत् अतीव सुखदम्। इदानीं नेत्रयोः वार्ता। दृष्टिरोगं निवारयितुम् एकः सूक्ष्मः नेत्र-निक्षेपः (Eye Implant) रचितः अस्ति। एवं वैज्ञानिकैः अन्धत्वं पराजितम्।
**नन्दिनी-** साधु! विज्ञानस्य प्रगत्या मानवकुलं रक्षितम्। अद्य एतावती एव वार्ता। पुनर्मेलिष्यावः।

हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# हास्यकणिका



द्वयोः मित्रयोः मध्ये वार्तालापम्

**प्रथमं मित्रम्-** यदा जीवने प्रसन्नः भवितुम् इच्छति, तर्हि पत्न्या सह ध्यानेन वार्तालापं करोतु!
**द्वितीयं मित्रम्-** ध्यानेन किमर्थम्?
**प्रथमं मित्रम्-** यदि सः किमपि भार्यां वदति, तु यथा ग्राहकसेवा दूरवाण्याः उपरि ध्वनिमुद्रणः भवति- "भवतः दूरभाषः भविष्ये सन्दर्भार्थं अभिलेखितः अस्ति....", तदैव भार्या अपि भविष्यस्य कृते भवतः वार्ताः स्वस्य मस्तिष्के संग्रहं करोति, यथासमयं च तस्याः प्रयोगं करोति युद्धार्थम् 😨😨
**द्वितीयं मित्रम्-** 😖😖😖

# पूर्वोत्तरप्रदेशेषु बिहारे च गहनकुहरः भवितुं नारङ्गवर्णीयं सचेतना

पूर्वोत्तरप्रदेशेषु बिहारे च गहनकुहरः भवितुं नारङ्गवर्णीयं सचेतना मौसमविभागेन अधिसूचिता। विभागेन उक्तं यत् सोमवासरे बिहार, छत्तीसगढ, हिमाचलप्रदेश, झारखण्ड, मध्यप्रदेश, ओडिशा, उत्तराखण्ड, पूर्वोत्तरभागेषु केषुचित् स्थानेषु सघनकुहरः प्रचलति। मौसमविभागेन सोमवासरे कर्नाटक-तेलाङ्गाना-बिहार-उत्तर-प्रदेश-हरियाणा-चण्डीगढ-दिल्ली-पञ्जाब-देशेषु शीततरङ्गस्य पूर्वानुमानं कृतम् अस्ति। आगामिषु २४ घण्टासु पश्चिमहिमालयप्रदेशे हिमपातः भवितुम् अर्हति । इदानीं राष्ट्रियराजधानीक्षेत्रे-दिल्लीदेशे वायुगुणवत्ता दुर्बलवर्गे एव वर्तते।